# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (११)

११.०२.२०१३

# पुनरावर्तनम्

- स्त्रीप्रत्ययाः - स्त्रीत्वबोधकाः प्रत्ययाः ।
- टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति ।
- टाप् - अजाद्यतष्टाप् ।
- डाप् - डाबुभाभ्यामन्यतरस्याम् ।
- ङीप् - ऋन्नेभ्यो ङीप्, उगितश्च, वनो र च, पादोऽन्यतरस्याम्, टिड्ढाणञ्..., यञश्च
- ष्फ+ङीष् - प्राचां ष्फ तद्धितः, सर्वत्र लोहितादिकतन्तेभ्यः, कौरव्यमाण्डूकाभ्यां च,
- ङीप् - वयसि प्रथमे, द्विगोः, अपरिमाण..., काण्डान्तात्क्षेत्रे, पुरुषात्प्रमाणे..

# ४८३. ऊधसोऽनङ् (५.४.१३१)

- पदद्वयम् । ऊधसः, अनङ् ।
- ‘बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्’ (५.४.११३) इत्यतः ‘बहुव्रीहौ’ इति अनुवर्तते ।
- ऊधोऽन्तस्य बहुव्रीहेः अनङादेशः स्यात् स्त्रियाम्।

- कुण्डम् इव ऊधः यस्याः
- कुण्ड सु ऊधस् सु (‘अनेकमन्यपदार्थे’ - २.२.२४)
- कुण्ड सु ऊध अन् सु (‘ऊधसोऽनङ्’ - ५.४.१३१)
- कुण्ड सु ऊधन् सु (‘अतो गुणे’ - ६.१.९७)
- कुण्ड ऊधन् (‘सुपो धातुप्रातिपदिकयोः’ - २.४.७१)
- कुण्डोधन् (‘आद्गुणः’ - ६.१.८७)
- इत्यनङि कृते डाब्ङीब्निषेधेषु प्राप्तेषु ।
- डाब्ङीब्निषेधेष्विति ।

# ४८४. बहुव्रीहेरूधसो ङीष् (४.१.२५)

- पदत्रयम् । बहुव्रीहेः, ऊधसः, ङीष् ।
- ‘स्त्रियाम्’ (४.१.३) इत्यधिक्रियते ।
- ऊधोऽन्ताद् बहुव्रीहेः ङीष् स्यात् स्त्रियाम् ।
- कुण्डोध्नी ।
- कुण्डोध्नीति ।

- स्त्रियां किम् - कुण्डोधो धैनुकम् ।
- धेनूनां समूहः इत्यर्थः ।
- इहानङ्पि न । तद्विधौ ‘स्त्रियाम्’ (वा) इत्युपसंख्यानात् ।

# ४८५. सञ्ज्ञाव्ययादेर्ङीप् (४.१.२६)

- पदद्वयम् । सञ्ज्ञा-अव्ययादेः, ङीप् ।
- 'बहुव्रीहेरूधसो ङीष्' (४.१.२५) इत्यतः 'बहुव्रीहेः, ऊधसः' इति अनुवर्तते ।
- ङीषोऽपवादः ।
- संख्याव्ययादेः ऊधोऽन्ताद् बहुव्रीहेः स्त्रियां ङीप् स्याद् इत्यर्थः ।
- द्व्यूध्नी ।
- द्वे ऊधसी यस्याः ।
- अत्यूध्नी ।
- अतिशयितम् ऊधः यस्याः ।

- बहुव्रीहेरित्येव ।
- ऊधोऽतिक्रान्ता अत्यूधाः ।
- ऊधोऽतिक्रान्तेति ।

# ४८६. दामहायनान्ताच्च (४.१.२७)

- पदद्वयम् । दाम-हायनान्तात्, च ।
- ‘बहुव्रीहेरूधसो ङीष्’ (४.१.२५) इत्यतः ‘बहुव्रीहेः, ऊधसः’, ‘सङ्ख्याव्ययादेर्ङीप्’ (४.१.२६) इत्यतः ‘संख्यादेः, ङीप्’ इति च अनुवर्तते ।
- संख्यादेः बहुव्रीहेः दामान्ताद् हायनान्ताच्च ङीप् स्यात् ।
- संख्यादेरिति ।
- दामान्ते डाप्-प्रतिषेधयोः प्राप्तयोः, हायनान्ते टापि प्राप्ते वचनम् ।
- दामान्ते इति ।
- द्विदाम्नी ।
- द्विदाम्नीति ।

- अव्ययग्रहणाननुवृत्तेः उद्दामा वडवेत्यत्र डाब्निषेधावपि पक्षे स्तः ।

- द्विहायनी बाला ।

# त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम् (वा) वयोवाचकस्यैव हायनस्य ङीब्णत्वं चेष्यते (वा)

- त्रिहायणी ।
- चतुर्हायणी ।
- वयसोऽन्यत्र द्विहायना, त्रिहायना, चतुर्हायना शाला ।

# ४८७. नित्यं संज्ञाच्छन्दसोः (४.१.२९)

- पदद्वयम् । नित्यम्, संज्ञा-छन्दसोः ।
- 'बहुव्रीहेरूधसो ङीष्' (४.१.२५) इत्यतः 'बहुव्रीहेः' इति, 'संख्याव्ययादेर्ङीप्' (४.१.२६) इत्यतः 'ङीप्' इति, 'अन उपधालोपिनोऽन्यतरस्याम्' (४.१.२८) इत्यतः 'अनः, उपधालोपिनः' इति च अनुवर्तते ।
- अन्नन्ताद्बहुव्रीहेः उपधालोपिनः ङीप् स्यात् संज्ञाच्छन्दसोः ।
- सुराज्ञी नाम नगरी ।
- अन्यत्र पूर्वेण विकल्प एव ।
- वेदे तु शतमूर्ध्नी ।

# ४८८. केवलमामकभागधेयपापापर-समानार्यकृतसुमङ्गलभेषजाच्च (४.१.३०)

- पदद्वयम् । केवल-मामक-भागधेय-पाप-अपर-समान-आर्यकृत-सुमङ्गल-भेषजात्, च ।
- ‘संख्याव्ययादेर्ङीप्’ (४.१.२६) इत्यतः ‘ङीप्’ इति, ‘नित्यं संज्ञाच्छन्दसोः’ (४.१.२९) इति पूर्णं च अनुवर्तते ।
- एभ्यो नवभ्यो नित्यं ङीप् स्यात् संज्ञाच्छन्दसोः ।
- ‘अथो त इन्द्रः केवलीर्विशः’, ‘मामकी तनू’ ।
- भागधेयी । पापी । अपरी । समानी । आर्यकृती । सुमङ्गली । भेषजी ।
- अन्यत्र केवला इत्यादि ।

- मामकग्रहणं नियमार्थम्, अणणन्तत्वादेव सिद्धेः ।
- तेन लोकेऽसंज्ञायां मामिका ।